# अम्बा

## आमुखम्

प्रथमपाठे कुटुम्बसबन्धं परस्परस्नेहं च सूचयित्वा केषाञ्चन बन्धुवाचकशब्दानां परिचायनं च कृतम्। अस्मिन् पाठे मातुः स्वशिशुं प्रति, शिशोः मातरं प्रति च विद्यमानः स्नेहः वर्णितः। प्रातः आरभ्य रात्रौ निद्रापर्यन्तं मात्रा शिशवे क्रियमाणानि कार्याणि गीतके अस्मिन् बालिका अनुस्मरति। अध्यापकः गानमिदं सतालम् आलपति। छात्राः संघशः एकैकशः च गानम् आलपन्ति। अभिनयगीतरूपेण अपि इदं गीतम् अवतारयितुं शक्यते। विभिन्नेषु तालेषु अस्य आलपनाय छात्रान् प्रेरयतु।

**पाठनाम - अम्बा**

कालांशाः - १४

उद्देश्यम् - मातृस्नेहः महत्तरः।

संस्कृतगीतश्रवणाय अवसरः।

नैपुणी - संस्कृतगानालपननैपुणी। मातरं प्रति सुस्थिरस्नेहभावः।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| मातृस्नेहः महत्तरः। | संस्कृतगीतालपनम्। | संस्कृतगीतम् आलपति। |
| जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। | लघुवाक्यानां श्रवणं वाचनं च। | लघुवाक्यानि शृणोति वदति च। |
| गीतम्। (*TB* ) | अक्षरपरिचयः। | अक्षरपरिचयं प्राप्नोति। |
| कथा। (*HB*) | क्रियापदानां परिचयः। | क्रियापदानि परिचिनोति। |
| त (अक्षरम्) (*TB*) | अक्षरे वर्णलेपनम्। | त इत्यक्षरं वर्णेन लिम्पति। |
| | संस्कृतभारत्याः ध्वनिमुद्रिका। | |



लघुवाक्यानां वाचनाभ्यासाय चित्राणि वाक्यानि ा दत्तानि। चित्रेषु वर्णलेपनं छात्रान् भाषापठनं प्रति ाकर्षति। वाक्यानां वाचनेन संस्कृतभाषायाः श्रवणाय ावसरं लभते।

था -

एकस्मिन् ग्रामे एका बालिका अस्ति। तस्याः हे एकः मार्जारशिशुः अस्ति। तस्य नाम चिन्नः इति।



सा वात्सल्येन तं चिन्नु इति आह्वयति। चिन्नु अतिचपलः भवति। सः महानसात् सदा कौशलेन क्षीरं पिबति। बालिकायाः माता तस्मै क्रुद्ध्यति। चिन्नस्य माता तं ताडयति च। दुःखितः सः बालिकायाः समीपम् आगत्य विलपति। तं समाश्वासयति च। सः स्वस्य चपलप्रवृत्तिषु पश्चात्तपति। मातृवचनानि अनुसृत्य जीवितुं चिन्नः प्रतिज्ञां करोति। ततः परं कदापि सः चापल्यं न करोति।

कथायाः कथनाभ्यन्तरे मध्ये मध्ये अध्यापकः लघुप्रश्नान् पृच्छति। कथांशस्य अवधारणपरान् लघुप्रश्नान् अध्यापकः पृच्छति। उत्तरं वक्तुं छात्रान् प्रेरयति च। केचन प्रश्नाः - यथा -

(क) मार्जारस्य नाम किम्?
(ख) मार्जारः कीदृशः भवति?
(ग) सः कीदृशं चापल्यं करोति?
(घ) चिन्नः किमर्थं रोदिति?
(ङ) सः कीदृशीं प्रतिज्ञां करोति?



कथाकथनानन्तरम् अध्यापकः छात्रान् मातृस्नेहं तथा मातुः उत्तरदायित्वम् च उद्बोधयति।

ततः अध्यापकः, माता युष्माकं कृते किं किं करोति? इति पृच्छतु। यदा छात्राः वदन्ति तदा माता लालयति, माता स्निह्यति, माता भोजनं ददाति इत्यादिकं बोधयन्तु। ततः, वयं मातृस्नेहम् अधिकृत्य किमपि गीतम् आलपामः इति उक्त्वा गीतम् आलपतु।

**प्रवर्तनम् - १**

**गीतालपनम्**

**उद्देश्यम्** - संस्कृतगीतश्रवणाय अवसरः।

अध्यापकः सतालं द्वित्रवारं गानम् आलपति। छात्राः अनुगायन्ति। अनेन छात्रः संस्कृतगीतश्रवणाय अवसरं लभते। तालपरिवर्तनं कृत्वापि गीतस्य आलपनं कर्तुं शक्यते।

**मूल्यनिर्णयसूचिकाः** -

सतालम् आलपति।

सुस्पष्टं गायति।

**प्रवर्तनम्** - २

**चित्रेषु वर्णलेपनम्**

**उद्देश्यम्**- वर्णलेपनसामर्थ्यम्।

चित्रेषु उचितवर्णलेपनाय निर्दिशति। अनन्तरम् उत्तमं चित्रम् अध्यापिका कक्ष्यायां प्रदर्शयति अनुमोदते च।

**मूल्यनिर्णयसूचिकाः** -

उचितवर्णलेपनम्।

आकर्षणीयता।

**प्रवर्तनम्** - ३

**वाचनम्**

**उद्देश्यम्** - संस्कृतवाक्यानां वाचननैपुणी।

अध्यापकः पादटिप्पणीरूपेण दत्तानि वाक्यानि द्वित्रवारम् उच्चैः स्पष्टतया च वाचयति। अनन्तरं छात्रान् अनुवाचनाय प्रेरयति च।

**मूल्यनिर्णयसूचिकाः** -

उच्चैः स्पष्टतया च वाचनम्।

अर्थज्ञानम्।

**प्रवर्तनम्** - ४

**अक्षरपूरणम्**

**उद्देश्यम्** - वर्णलेपनद्वारा अक्षरप्रत्यभिज्ञानम्।

अध्यापकः अक्षराणां सम्यक् पूरणाय निर्दिशति। तदनन्तरं तत् वर्णेन लेपनाय च निर्दिशति।

**मूल्यनिर्णयसूचिकाः -**

उचितरूपेण पूरणम्।

वर्णलेपनम्

**प्रवर्तनम् -५**

**आप्तवाक्यपरिचयः**

**उद्देश्यम् -** आप्तवाक्यश्रवणाय अवसरः।

अध्यापकः मातृभाषायां परिचिताः बालकविताः स्मृत्वा आलपनाय छात्रान् प्रेरयति। एवं छात्राः मातृस्नेहयुक्तां कवितां कक्ष्यायाम् अवतारयति। अनन्तरम् अध्यापकः संस्कृतभाषायामपि एतादृशाः बालकविताः मातृस्नेहसम्बन्धीनि महद्वचनानि च सन्ति इति वदति। यथा-

मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।(तैत्तिरीयोपनिषद्)

माता किल मनुष्याणां

दैवतानां च दैवतम्।(मध्यमाव्यायोगः- भासः)

अध्यापकः एतादृशानि आप्तवाक्यानि स्फोरकपत्राणि उपयुज्य कक्ष्यायां प्रदर्श्य अनुवाचनाय निर्दिशतु।

**मूल्यनिर्णयसूचिकाः -**

अर्थज्ञानम्

आशयग्रहणम्

**अनुबन्धप्रवर्तनानि-**

(क) आरोग्यसंरक्षणे व्यक्तिशुचित्वस्य प्राधान्यं उद्बोधयितुं केचन निर्देशाः दातव्याः।

(ख) अक्षरचित्ररचना- अस्मिन् पाठे तकारेण मार्गसमीकरणयानस्य (road roller) चित्रं निर्मातुं शक्यते।(**अनुबन्धः - ३**)

(ग) मातृभाषायां विद्यमानाः मातृसंबन्धिन्यः बालकविताः (ध्वनिमुद्रिकाद्वारा) श्रावयितव्याः।

(घ) काश्चन मातृसंबन्धिन्यः संस्कृतबालकविता अनुबन्धे दत्ताः।(**अनुबन्धः - ४**)

(ङ)संस्कृतभारत्याः ध्वनिमुद्रिकायां विद्यमानं गीतं श्रावयितुं शक्यते ।

यथा - मम माता देवता (२)
अतिसरला मयि मृदुला
गृहकुशला सा अतुला
मम माता देवता।।
(लोकजालिका - http // www.sanskritabharati.org)